2026

संस्कृतव्याकरणम्

MAVYC402

लघुशब्देन्दुशेखरः (कारकप्रकरणम्)

द्वितीयपत्रम्

पूर्णाङ्काः –80

समयः- घण्टात्रयम्

अधस्तानानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम्। **1×10=10**

1. नागेशभट्टमते कारकस्य किं लक्षणम् ?
2. प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा, इति सूत्रे कति पदानि सन्ति ?
3. सम्बोधने च, सूत्रेण का विभक्तिर्विधीयते ?
4. कारके, सूत्रं कीदृशं सूत्रम् ?
5. पयसा ओदनं भुङ्क्ते, इदमुदाहरणं कदा सम्भवति ?
6. तथायुक्तं चानीप्सितमिति सूत्रे तथायुक्तत्वञ्च कीदृशम् ?
7. अन्तरान्तरेण युक्ते, इति सूत्रे अन्तरान्तरेण अव्ययमनव्ययं वा ?
8. स्वतन्त्रः कर्ता, इति सूत्रे स्वातन्त्र्यम् कीदृशं विवक्षितम् ?
9. ध्रुवमपायेऽपादानमिति, सूत्रे अपायपदार्थः कः?
10. अधिकरणं कतिविधं तेषु कस्य मुख्यत्वमिति ?

केचन पञ्चप्रश्नाः समाधेयाः। **6×05=30**

11. सम्बोधने च, इति सूत्रं ग्रन्थदिशा व्याख्यायताम्।
12. अभिधानञ्च प्रायेण तिङ्कृत्तद्धितसमासैरिति पङ्क्तिः व्याख्येया।
13. अकथितञ्च, सूत्रं ग्रन्थदिशा प्रतिपाद्यताम्।
14. स्वतन्त्रः कर्ता सूत्रं सोदाहरणं व्याख्यायताम्।
15. कर्मप्रवचनीयाः, सूत्रं व्याख्यायताम्।
16. नमः स्वस्तिस्वाहास्वधालंवषट्योगाच्च सूत्रं व्याख्यायताम्।
17. षष्ठी शेषे, सूत्रं व्याख्यायताम्।

केचन चत्वारो प्रश्नाः समाधेयाः। **10×4=40**

18. प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा, सूत्रं नागेशानुगुणं प्रतिपाद्यताम्।
19. कर्तुरीप्सिततमं कर्म, सूत्रं विव्रियताम्।
20. साधकतमं करणमिति सूत्रं व्याख्यायताम्।
21. कर्मणा यमभिप्रैति स सम्प्रदानमिति सूत्रं शेखरानुगुणं प्रतिपाद्यताम्।
22. ध्रुवमपायेऽपादानमिति सूत्रं सोदाहरणं व्याख्यायताम्।
23. आधारोऽधिकरणमिति सूत्रं विविच्यताम्।

****